Preface

## प्रस्तावना

**विषयः- ज्योतिषशास्त्रीयवृद्धवसिष्ठंहितायाः संपादनं तौलनिकमध्ययनं च विधानं प्रथमम्-महाप्रबन्धेन नवीनसंशोधनं किम् ?समुपलब्धज्ञानस्य कथं वर्धनम् ?**

**ज्योतिषशास्त्रं तस्य महत्त्वम् च-**

ज्योतिषशास्त्रमतीव प्राचीनं महत्त्वपूर्णं च शास्त्रम्। ज्योतिषामयनं चक्षुरिति वेदस्य चक्षुत्वेनास्य प्रसिद्धिः। वेदाङ्गज्योतिषादारभ्य बहवो ग्रन्थाः समुपलभ्यन्ते। ज्योतिषशास्त्रस्य गणितज्योतिषं फलज्योतिषं चेति द्विविधत्वं सर्वज्ञातम्। तथैवास्य संहिता होरा गणितमिति त्रिस्कन्धात्मकं ज्योतिषम्। देशस्य कालस्य तथा समस्तप्राणिनां शुभफलबोधको ग्रन्थः संहिता कथ्यते। भूकम्पः, भूस्खलनं, वैनाशिको झंझावातः, प्राकृतिकविपत्तिकाले भवित्री धन-जनहानिः- इत्यादयो विषया ज्योतिषस्य संहितास्कन्धान्तर्गताः। संहिताशास्त्रविषयाणां विकासोऽथर्ववेदादारब्धः सूत्रकालरूपेण, विशेषरूपेणाभवत्। तस्य विकासो जीवनस्य व्यवहारिकक्षेत्रेषु ज्योतिषविषयकतत्त्वानां स्थानं प्रदर्शयितुं स्यात्। दिक्देशकालव्यजकत्वेन यज्ञ-तप-दान-व्रतोपवास-पर्वादिसकलकर्मणामादिबीजकारणेनान्यशास्त्रापेक्षया ज्योतिषशास्त्र-स्याध्ययनमावश्यकम्। वेद-वेदाङ्ग-उपनिषद्-दर्शन-पुराणेतिहासादीनामेकमात्रं सिद्धान्तः - सर्वे मनुष्या यज्ञ-तप-दान-व्रतादिसाधनाद्वारा ईश्वरप्राप्तिध्येयं सिद्धं कुर्वन्वित्यभिलाषा सेव्यते। किन्त्वुचितसमये कर्म कृतं सफलं भवति। अकाले कृतं कर्म निष्फलं भवति। दुर्गतिः प्राप्यते। अत एव कालात्मकज्योतिषशास्त्रस्य प्रयोजनं पदे पदे स्पष्टं सिद्धं भवति। तस्य ज्ञानं विना वैदिकं

लौकिकं वा किमपि कार्यं न सिद्ध्यति। निश्चितमुहूर्ते निश्चितकालान्तर्गतः संस्कार एवं समस्तयज्ञक्रिया सम्पन्ना भवितुं आवश्यका। तस्य ज्ञानहेतोर्ज्योतिषशास्त्रीयं पञ्चाङ्गमेकमात्रमाधारः पञ्चाङ्गद्वारा संस्कारो यज्ञानुष्ठानं एवं यात्रादिकार्यसम्बन्धितमुहूर्तानां ज्ञानं शक्यं भवति।ज्योतिषशास्त्रस्य ज्ञानेन स्वर्गादिरुत्तमलोको प्राप्यते। यद्विषये उक्तम् –

वेदस्य निर्मलं चक्षुर्ज्योतिःशास्त्रमकल्मषम्।

विनैतदखिल कर्म श्रौतं स्मार्त्तं न सिद्ध्यति।। (ना.सं. अ.१ ४/२, ७/१)

**संहिताशास्त्रं वसिष्ठसंहिता च-**

संहिताशास्त्रं ज्योतिषशास्त्रस्य प्रथमप्रादुर्भाव इति मन्यते। संहिताग्रन्थेषु निमित्तं, वास्तुशास्त्रं, मुहूर्तशास्त्रं, प्रश्नशास्त्रं, सामुद्रिकशास्त्रं, स्वप्नविचारः, अङ्गस्फुरणं, पल्लीपतनं, उत्पाताः, वृष्टिज्ञानम्, अरिष्टं, एवं शकुनम्- एते विषयाः समाविष्टाः। ग्रहचारातिरिक्तं वायसविरुतं, शवारुतं, मृगचेष्टितं, श्वचेष्टितं, गवेङ्गितं, अश्वेङ्गितं, हस्तचेष्टितं –आदीनां विस्तृतं विवेचनमुपलभ्यते।

संहिताग्रन्थेषु बृहत्संहिता, बार्हस्पत्यसंहिता, गर्गसंहिता, गुरुसंहिता, बृहस्पतिसंहिता, नारदसंहिता, नारदीयसंहिता, वाराहसंहिता, भृगुसंहिता, रावणसंहिता, वृद्धवसिष्ठसंहिता, वृद्धगर्गसंहिता, लोमशसंहिता, गौतमसंहिता– एते ग्रन्था ज्ञायन्ते। तेषु ग्रन्थेषु तत्र नारदसंहिता तथा बृहत्संहिता बहु प्रचलितास्ति।

संहिताग्रन्थेषु वसिष्ठेन रचिताया वसिष्ठसंहिताया नाम प्रथममायाति। अत्र विषयाः सुगम्भीराः सुस्पष्टा निबद्धाः सन्ति। सर्वेषु वैदिकग्रन्थेषु, पुराणेषु, धर्मशास्त्रेषु, अन्येषु संस्कृतवाङ्मयेषु च वसिष्ठस्य स्थानं महत्त्वपूर्णं दरीदृश्यते। वसिष्ठविश्वामित्रयोः परिवादकथाः प्रथिताः सन्ति। सप्तर्षिमण्डलेषु वसिष्ठस्य अन्यतमस्थानम्। ज्योतिषशास्त्रस्यसष्टादशप्रवर्तकेषु वसिष्ठस्य नाम वर्तते। अतः स्वाभाविकीयं जिज्ञासा भवति यदस्य वसिष्ठसंहितानामधेयस्य लौकिकसंस्कृते विरचितस्य रचयिता कतमो वसिष्ठः? पौराणिकपरम्परायां दृश्यते, यद् व्यासनाम्ना विदुषां परम्परा प्राचीनकालादेव समागता प्रतिभाति। एवमेव वसिष्ठनाम्नापि वैदिककालत आचार्यकालपर्यन्तं वसिष्ठाभिधा बहवो वसिष्ठा संजाताः। संहिताकारेषु वसिष्ठपदप्रयोगे द्वौ भेदौ दृश्येते। कुत्रचिन्महर्षिवसिष्ठशब्दस्य प्रयोगो दृश्यते कुत्रचिद्वृद्धवसिष्ठशब्दस्योल्लेखः प्राप्यते। नामभेदेनापि ग्रन्थभेदो न दृश्यन्ते। अतो वक्तुं शक्यते यद्वृद्धवसिष्ठ एव वसिष्ठः। वसिष्ठसंहिताग्रन्थे प्रत्येकाध्यायान्ते – इतिश्रीब्रह्मर्षि- वृद्धवसिष्ठसंहितायां ............ । इति उक्तम्। याज्ञवल्क्यस्मृतिटीकायां मिताक्षरायां वृद्धवसिष्ठस्य मतमुद्धृतम्। एवं भट्टोजिदीक्षितोऽपि वृद्धवसिष्ठस्योल्लेखं करोति। अतः वृद्धवसिष्ठनाम्ना कोऽपि धर्माचार्य आसीदिति मन्यते। ज्योतिषसंहिताकारस्य वसिष्ठस्य समयो वराहमिहिरपूर्वकाले (ख्रि.५०५) शक्यते। उपलब्धसंहिता प्रायेण भट्टोत्पलपूर्वकालीनास्तीति(ख्रि.९६६) निश्चयेन वक्तुं शक्यते।अथ वसिष्ठसंहिता प्राचीनो ग्रन्थः, किन्तु तद्विषयेऽधिकांशजना न जानन्ति तथा चायं ग्रन्थो बहुप्रचलितो नास्ति।

अथ श्रीब्रह्मर्षिवृद्धवसिष्ठविरचितां वसिष्ठसंहितायां विविधज्योतिषशास्त्रीयविषयोपरि षट्चत्वारिंशद्(४६)अध्यायाः सम्मिलिताः सन्ति । तथा च सर्वेष्वध्यायेषु श्लोका एव सन्ति, न गद्यम्। विविधछन्दोबद्धोऽयं ग्रन्थः। अस्मिन्संहिताग्रन्थे – सिद्धान्तविभागे सूर्यादीनां नवग्रहाणां चारविषये प्रतिपादितम्। पञ्चाङ्गप्रकरणे तिथि–वार–नक्षत्र–योग–करणादीनां व्यवहारे किं महत्त्वम् –इति स्पष्टीकृत्य विस्तृतं विवरणं निर्दिष्टमस्ति। मनुष्याणां जीवने गर्भाधानादारभ्यान्त्येष्टिपर्यन्तं विविधाः संस्कारा वर्तन्ते। अत्र षोडशसंस्काणां महत्त्वं प्रदर्श्य विस्तृतरूपेण मुहूर्तविचारः प्रतिपादितः। वसिष्ठसंहितान्तर्गतः वास्त्वाध्याये गृहनिर्माणे ग्रामसप्तपुरादीनां सविस्तरं विवेचनं कतं यद्ग्रन्थस्यास्य वैशिष्ट्यमस्ति। तथा चान्ये महत्त्वपूर्णा विषया यथा यात्राध्यायः, वस्त्रपरिधानाध्यायः, गुणदोषनिरूपणाध्यायः, उत्पाताध्यायः, राजाभिषेकाध्यायस्तथा विविधशान्त्यादीनां विवेचनं शान्त्याध्याये कृतमस्ति। वसिष्ठसंहिताग्रन्थे षडचतुर्विंशताध्याये (४६) २,७१९ श्लोकाः सम्मिलिताः।

**वसिष्ठसंहितायाः प्रथमवारमेव वैज्ञानिकं संपादनं समीक्षात्मकं तौलनिकमध्ययनं च**

वसिष्ठस्य संहितायाः संपादनपूर्वकमध्ययनस्य महाशोधप्रबन्धस्य मुख्यो विषयः। तदर्थं प्रथमं वसिष्ठसंहितायाः पाठनिर्धारणार्थं प्राच्यविद्यामंदिरस्थानां चत्वारि मातृकाणां मुख्यत्वेन तुलानात्मकमध्ययनं सुसूक्ष्ममध्ययनं कृतम्। वेंकटेश्वरप्रेसद्वारा ख्रिस्ताब्दस्य १९१६मध्ये प्रकाशितस्य ग्रन्थस्यापि समुपयोगः कृतः। तथापि तत्र तत्र नैकेषु स्थानेषु पाठशुद्धीकरणं

संस्करणमावश्यकमासीत्।आधारभूतमातृकाणां तत्र विवेचनं नास्ति। संधोधितपाठलेखनस्य पाठनिर्धारणस्य पाठलेखनस्य पद्धतिरपि न तथा प्रमाणभूता विद्यते। मम संशोधन कार्यं प्रचलन्नासीत्, तदैव चौखम्बाप्रकाशनसंस्थया वसिष्ठसंहिताया हिन्दी–अनुवादसहितं प्रकाशनं कृतम्। तदपि न तथा प्रमाणभूतमित्यहं मन्ये। उपयुक्तमातृकाणां विवरणं नास्ति। पाठभेदानां लेखनं दृश्यते। पाठनिर्धारणनियमानां विवेचनं नास्ति। अत एव मयास्मिन् प्रबन्धे प्रथमवारमेव संपादनस्य वैज्ञानिकीं पद्धतिमाश्रित्य पाठनिर्धारणं कृत्वा शुद्धस्य प्राचीनतमस्य प्रमाणभूतस्य संहितायाः पाठस्य पाठभेद–मातृकाविवरणादिसहितस्य विशेषरूपेण प्रतिष्ठपनस्य प्रयत्नः कृतोऽस्ति। अन्यच्च, संपादितसंहितायाः समग्रतया ज्योतिषशास्त्रं वास्तुशास्त्रं धर्मशास्त्रं –इति विविधदृष्ट्या प्रथमवारमेव सूक्ष्मतयाध्ययनं विहितम्। तस्य विचाराणां सिद्धान्तानां च वराहमिहिादिप्रसिद्धसंहिताकाराणां विचारैर्विवरणैः साकं तुलनात्मकमध्ययनं च प्रस्तुतम्। एतेन वसिष्ठस्य मुहूर्तशास्त्रं धर्मशास्त्रं फलशास्त्रं वास्तुशास्त्रमिति विविधज्योतिषसंहिताङ्गभूतेषु महत्त्वपूर्णं विशिष्टमनन्यसाधारणं प्रदानं किं वर्तते–अस्य निष्कर्षरूपेण प्रतिपादनस्यापि महाप्रबन्धे प्रयत्नः कृतोऽस्ति।

**विधानं द्वितीयम्–आधारभूता सामग्री, ऋणनिर्देशः, प्रतिपादने नवीनता च–**

अत्र शपथपूर्वकमुद्घोष्यते यत्–अस्मिन् महाप्रबन्धे मया विविधानां प्रकाशिताप्रकाशितानां मूलभूतानां तथा चाधारग्रन्थानां ग्रन्थकाराणां,पुस्तकानां लेखानां कोशग्रन्थानां च प्रमाणभूतायाः